# Navagraha Suprabhatam

# નવગ્રહ સુપ્રભાતમ્

## Document Information

Text title : navagrahasuprabhAtam

File name : navagrahasuprabhAtam.itx

Category : suprabhAta, navagraha

Location : doc_z_misc_navagraha

Transliterated by : Lakshmi R.S. lakish at gmail.com, NA, PSAEaswaran

Proofread by : PSAEaswaran. (KSR, Avinash Sathaye were involved in the discussion.)

Latest update : September 17, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# નવગ્રહ સુપ્રભાતમ્

સૂર્યઃ

પૂર્વાપરાદ્રિ સઞ્ચાર ચરાચરવિકાસક ।
ઉત્તિષ્ઠ લોકકલ્યાણ સૂર્યનારાયણ પ્રભો ॥ ૧॥ કુરુ કલ્યાણ

સપ્તાશ્વરશ્મિરથ સન્તતલોકચાર
શ્રી દ્વાદશાત્મકમનીયત્રિમૂર્તિરૂપ । મનોજ્ઞત્રિમૂર્તિરૂપ
સન્ધ્યાત્રયાર્ચિત વરેણ્ય દિવાકરેશા
શ્રી સૂર્યદેવ ભગવન્ કુરુ સુપ્રભાતમ્ ॥ ૨॥

અજ્ઞાનગાહતમસઃપટલં વિદાર્ય
જ્ઞાનાતપેન પરિપોષયસીહ લોકમ્ ।
આરોગ્યભાગ્યમતિ સમ્પ્રદદાસિ ભાનો
શ્રી સૂર્યદેવ ભગવન્ કુરુ સુપ્રભાતમ્ ॥ ૩॥

છાયાપતે સકલમાનવકર્મસાક્ષિન્
સિંહાખ્યરાશ્યધિપ પાપવિનાશકારિન્ ।
પીડોપશાન્તિકર પાવન કાઞ્ચનાભ
શ્રી સૂર્યદેવ ભગવન્ કુરુ સુપ્રભાતમ્ ॥ ૪॥

ચન્દ્ર

સર્વલોકસમુલ્હાસ શઙ્કરપ્રિયભૂષણા ।
ઉત્તિષ્ઠ રોહિણીકાન્ત ચન્દ્રદેવ નમોઽસ્તુતે ॥ ૫॥

ઇન્દ્રાદિ લોકપરિપાલક કીર્તિપાત્ર
કેયૂરહારમકુટાદિ મનોજ્ઞગાત્ર ।
લક્ષ્મીસહોદર દશાશ્વરથપ્રયાણ
શ્રી ચન્દ્રદેવ કુમુદપ્રિય સુપ્રભાતમ્ ॥ ૬॥

શ્રી વેઙ્કટેશનયન સ્મરમુખ્યશિષ્ય

વન્દારુભક્તમનસામુપશામ્ય પીદામ્ ।
લોકાન્ નિશાચર સદા પરિપાલય ત્વમ્
શ્રી ચન્દ્રદેવ કુમુદપ્રિય સુપ્રભાતમ્ ॥ ૭॥

નીહારકાન્તિકમનીયકલાપ્રપૂર્ણ
પીયૂષવૃષ્ટિપરિપોષિતજીવલોક ।
સસ્યાદિવર્ધક શશાઙ્ક વિરાણમનોજ
શ્રી ચન્દ્રદેવ કુમુદપ્રિય સુપ્રભાતમ્ ॥ ૮॥

આઙ્ગારક

મેરોઃ પ્રદક્ષિણં કુર્વન્ જીવલોકં ચ રક્ષસિ ।
અઙ્ગારક ગ્રહોત્તિષ્ઠ રોગપીડોપશાન્તયે ॥ ૯॥

આરોગ્યભાગ્યમમિતં વિતરન્ મહાત્મન્
રોગાદ્વિમોચયસિ સન્તતમાત્મભક્તાન્ ।
આનન્દમાકલય મઙ્ગલકારક ત્વમ્
મેષેન્દ્રવાહન કુજગ્રહ સુપ્રભાતમ્ ॥ ૧૦॥

સૂર્યસ્ય દક્ષિણદિશામધિસંવદાનઃ
કારુણ્યલોચન વિશાલદૃશાનુગૃહ્ય ।
ત્વદ્ધ્યાનતત્પરજનાનનૃણાન્ કરોષિ
મેષેન્દ્રવાહન કુજગ્રહ સુપ્રભાતમ્ ॥ ૧૧॥

બુધ

બુધ પ્રાજ્ઞ બુધારાધ્ય સિંહવાહન સોમજ ।
ઉત્તિષ્ઠ જગતાં મિત્ર બુદ્ધિપીડોપશાન્તયે ॥ ૧૨॥

હે પીતવર્ણ સુમનોહરકાન્તિકાય
પીતામ્બર પ્રમુદિતાખિલલોકસેવ્ય ।
શ્રીચન્દ્રશેખરસમાશ્રિતરક્ષકસ્ત્વમ્ ।
તારાશશાઙ્કજ બુધગ્રહ સુપ્રભાતમ્ ॥ ૧૩॥

દ્રાક્ષાગુલુચ્છપદબન્ધકવિત્વદાતઃ
આનન્દસંહિતવિધૂતસમસ્તપાપ ।
કન્યાપતે મિથુનરાશિપતે નમસ્તે
તારાશશાઙ્કજ બુધગ્રહ સુપ્રભાતમ્ ॥ ૧૪॥

ગુરુ

ધનુર્મીનાદિ દેવેશ દેવતાનાં મહાગુરો ।
બ્રહ્મજાત સમુત્તિષ્ઠ પુત્રપીડોપશાન્તયે ॥ ૧૫॥

ઇન્દ્રાદિ દેવબહુમાનિતપુત્રકાર
આચાર્યવર્ય જગતાં શ્રિતકલ્પપૂજ ।
તારાપતે સકલસન્નુતધીપ્રભાવ
શ્રીધીષ્પતિગ્રહ જનાવન સુપ્રભાતમ્ ॥ ૧૬॥

પદ્માસનસ્થ કનકામ્બર દીનબન્ધો
ભક્તાર્તિહાર સુખકારક નીતિકર્તઃ ।
વાગ્રૂપભેદસુવિકાસક પણ્ડિતેજ્ય
શ્રીધીષ્પતિગ્રહ જનાવન સુપ્રભાતમ્ ॥ ૧૭॥

શુક્ર

તુલાવૃષભરાશીશ પઞ્ચકોનસ્થિતગ્રહ ।
શુક્રગ્રહ સમુત્તિષ્ઠા પત્નીપીડોપશાન્તયે ॥ ૧૮॥

શ્વેતામ્બરાદિ બહુશોભિતગૌરગાત્ર
જ્ઞાનૈકનેત્ર કવિસન્નુતિપાત્ર મિત્ર ।
પ્રજ્ઞાવિશેષપરિપાલિતદૈત્યલોક
હે શુક્રદેવ ભગવન્ કુરુ સુપ્રભાતમ્ ॥ ૧૯॥

સઞ્જીવિનીપ્રમુખમન્ત્રરહસ્યવેદિન્
તત્ત્વાખિલજ્ઞ રમણીયરથાધિરૂઢ ।
રાજ્યારિયોગકર દૈત્યહિતોપદેશિન્
હે શુક્રદેવ ભગવન્ કુરુ સુપ્રભાતમ્ ॥ ૨૦॥

શનૈશ્ચર

મણ્ડલે ધનુરાકારે સંસ્થિતઃ સૂર્યનન્દન ।
નીલદેહ સમુત્તિષ્ઠ પ્રાણપીડોપશાન્તયે ॥ ૨૧॥

ચાપાસનસ્થ વરગૃધ્રરથપ્રયાણ ??
કાલાઞ્જનાભ યમસોદર કાકવાહ ।
ભક્તપ્રજાવનસુદીક્ષિત શમ્ભુસેવિન્
શ્રી ભાસ્કરાત્મજ શનૈશ્ચર સુપ્રભાતમ્ ॥ ૨૨॥

સંસારસક્તજનદુષ્પરિસ્વપ્રદાતઃ
ભક્તિપ્રપન્નજનમઙ્ગલસન્નિધાતઃ ।
શ્રીપાર્વતીપતિદયામયદૃષ્ટિપ્રવાચ var?? દયાકર દૃષ્ટિપૂત?
શ્રી ભાસ્કરાત્મજ શનૈશ્ચર સુપ્રભાતમ્ ॥ ૨૩॥

તૈલાન્નદીપતિલનીલસુપુષ્પસક્તઃ
કુમ્ભાદિપત્યમકરાધિપયે વહિત્વમ્ ।
નિર્ભીક કામિત ફલપ્રદ નીલવાસઃ
શ્રી ભાસ્કરાત્મજ શનૈશ્ચર સુપ્રભાતમ્ ॥ ૨૨॥

રાહુ

ગૌહુતે અધિદેવતા રાહો સર્પાઃ પ્રત્યધિદેવતાઃ ।
રાહુગ્રહ સમુત્તિષ્ઠા નેત્રપીડોપશાન્તયે ॥ ૨૫॥

નીલામ્બરાદિ સમલઙ્કૃત સૈંહિકેય
જ્ઞાનપ્રસન્ન વરદાનસુખાવહસ્ત્વમ્ । var ભક્ત પ્રપન્ન
શૂર્પાસનસ્થ સુજનાવહ સૌમ્યરૂપ ??
રાહુગ્રહપ્રવર નેત્રદ સુપ્રભાતમ્ ॥ ૨૬॥

સિંહાધિપશ્ચ તનુ સિંહગતાસનસ્ત્વમ્ var જટાસનસ્ત્વમ્
મેર્વપ્રદક્ષિણ ચરદુત્તરકાયશોભિમ્ ।
આદિત્યચન્દ્રગ્રસનાગ્રહલગ્નચિત્ત
રાહુગ્રહપ્રવર નેત્રદ સુપ્રભાતમ્ ॥ ૨૭॥

કેતુઃ

ચિત્રગુપ્તબ્રહ્મદેવૌ અધિપ્રત્યધિદેવતે ।
કેતુગ્રહ સમુત્તિષ્ઠ જ્ઞાનપીડોપશાન્તયે ॥ ૨૮॥

ચિત્રં ચ તે ધ્વજરથાદિ સમસ્તમેવ
સયેતરં ચ ગમનં પરિતસ્તુ મેરુમ્ ।
સૂર્યસ્ય વાયુદિતિસઞ્ચરતીહ નિત્યમ્
કેતુગ્રહપ્રવર મોક્ષદ સુપ્રભાતમ્ ॥ ૨૯॥

ત્વન્મન્ત્રજાપપરસજ્જન સંસ્તુતસ્સન્
જ્ઞાનં તનોશિ વિમલં પરિહાર્ય પીડામ્ ।

એવમ્ હિ સન્તતમનન્તદયાં કુરુ ત્વમ્
કેતુગ્રહપ્રવર મોક્ષદ સુપ્રભાતમ્ ॥ ૩૦॥

ફલશ્રુતિ

નિત્યં નવગ્રહદેવતાનામિહ સુપ્રભાતમ્ ।
યે માનવાઃ પ્રતિદિનં પઠિતું પ્રવૃત્તાઃ ॥

તેશાં પ્રભાતસમયે સ્મૃતિરઙ્ગભાજામ્ । ??
પ્રજ્ઞાં પરાર્ધસુલભાં પરમાં પ્રસૂતે ॥

આદિત્યાય ચ સોમાય મઙ્ગલાય બુધાય ચ ।
ગુરુશુક્રશનિભ્યશ્ચ રાહવે કેતવે નમઃ ॥

*Navagraha Suprabhatam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*